**Śrīmad Bhagavad Gītā – Chapter 12 – bhakti-yogaḥ**

*Easy to chant document*

# Chinmaya Mission Toronto

**Gītā Chanting Competition / Yajña 2026**

---

| | |
|---|---|
| ॐ श्री परमात्मने नमः | oṃ śrī pa-ra-māt-ma-ne na-maḥ |
| अथ द्वादशोऽध्यायः | a-**th**a*d* dvā-da-śo'-**dh**yā-yaḥ |
| भक्ति योगः | **bh**ak-ti-yo-gaḥ |
| | |
| अर्जुन उवाच । | ar-ju-na u-vā-ca \| |
| एवं सतत-युक्ता ये | e-vaṃ sa-ta-ta-yuk-tā ye |
| भक्तास्त्वां पर्युपासते । | **bh**ak-tās-tvāṃ par-yu-pā-sa-te \| |
| ये चाप्यक्षरमव्यक्तं | ye cāp-yak-ṣa-ra-mav-yak-taṃ |
| तेषां के योग-वित्तमाः ॥ १ ॥ | te-ṣāṃ ke yo-ga-vit-ta-māḥ \|\| 1 \|\| |
| | |
| श्रीभगवानुवाच । | śrī-**bh**a-ga-vā-nu-vā-ca \| |
| मय्यावेश्य मनो ये मां | may-yā-veś-ya ma-no ye māṃ |
| नित्य-युक्ता उपासते । | nit-ya-yuk-tā u-pā-sa-te \| |
| श्रद्धया परयोपेताः | śrad-**dh**a-yā pa-ra-yo-pe-tāḥ |
| ते मे युक्त-तमा मताः ॥ २ ॥ | te me yuk-ta-ta-mā ma-tāḥ \|\| 2 \|\| |
| | |
| ये त्वक्षरमनिर्देश्यम् | ye tvak-ṣa-ra-ma-nir-deś-yam |
| अव्यक्तं पर्युपासते । | a*v*-vyak-taṃ par-yu-pā-sa-te \| |
| सर्वत्र-गमचिन्त्यं च | sar-va*t*-tra-ga-ma-cin-tyaṃ ca |
| कूटस्थमचलं ध्रुवम् ॥ ३ ॥ | kū-ṭa*s*-s**th**a-ma-ca-laṃ **dh**ru-vam \|\| 3 \|\| |

सन्नियम्येन्द्रियग्रामं
सर्वत्र सम-बुद्धय: |
ते प्राप्नुवन्ति मामेव
सर्व-भूत-हिते रता: || ४ ||

san-ni-yam-yen-dri-ya*g*-grā-maṃ
sar-va*t*-tra sa-ma-bud-**dh**a-yaḥ |
te prāp-nu-van-ti mā-me-va
sar-va-**bh**ū-ta-hi-te ra-tāḥ || 4 ||

क्लेशोऽधिकतरस्तेषाम्
अव्यक्तासक्त-चेतसाम् ||
अव्यक्ता हि गतिर्दु:खं
देह-वद्भिरवाप्यते || ५ ||

kle-śo-’**dh**i-ka-ta-ras-te-ṣām
a*v*-vyak-tā-sak-ta-ce-ta-sām ||
a*v*-vyak-tā hi ga-tir-du*h*-**kh**aṃ
de-ha-vad-**bh**i-ra-vāp-ya-te || 5 ||

ये तु सर्वाणि कर्माणि
मयि संन्यस्य मत्परा: |
अनन्येनैव योगेन
मां ध्यायन्त उपासते || ६ ||

ye tu sar-vā-ṇi kar-mā-ṇi
ma-yi sann-yas-ya mat-pa-rāḥ |
a-nan-ye-nai-va yo-ge-na
māṃ **dh**yā-yan-ta u-pā-sa-te || 6 ||

तेषामहं समुद्धर्ता
मृत्यु-संसार-सागरात् |
भवामि न चिरात्पार्थ
मय्यावेशित-चेतसाम् || ७ ||

te-ṣā-ma-haṃ sa-mud-**dh**ar-tā
mṛt-yu-saṃ-sā-ra-sā-ga-rāt |
**bh**a-vā-mi na-ci-rāt-pār-**th**a
may-yā-ve-śi-ta-ce-ta-sām || 7 ||

मय्येव मन आधत्स्व
मयि बुद्धिं निवेशय |
निवसिष्यसि मय्येव
अत ऊर्ध्वं न संशय: || ८ ||

may-ye-va ma-na ā-**dh**at-sva
ma-yi bud-**dh**iṃ ni-ve-śa-ya |
ni-va-siṣ-ya-si may-ye-va
a-ta ūr**dh**-vaṃ na saṃ-śa-yaḥ || 8 ||

अथ चित्तं समाधातुं
न शक्नोषि मयि स्थिरम् |
अभ्यास-योगेन ततः
मामिच्छाप्तुं धनञ्जय || ९ ||

a-**tha** cit-taṃ sa-mā-**dhā**-tuṃ
na śak-no-ṣi ma-yis-s**thi**-ram |
a**bh**-yā-sa-yo-ge-na ta-taḥ
mām-ic-**ch**āp-tuṃ **dha**-nañ-ja-ya || 9 ||

अभ्यासेऽप्यसमर्थोऽसि
मत्कर्मपरमो भव |
मदर्थमपि कर्माणि
कुर्वन्सिद्धिमवाप्स्यसि || १० ||

a**bh**-yā-se’-pya-sa-mar-**tho**’-si
mat-kar-ma-pa-ra-mo **bha**-va |
ma-dar-**tha**-ma-pi kar-mā-ṇi
kur-van-sid-**dh**i-ma-vāp-sya-si || 10 ||

अथैतदप्यशक्तोऽसि
कर्तुं मद्योगमाश्रितः |
सर्व-कर्म-फलत्यागं
ततः कुरु यतात्मवान् || ११ ||

a-**th**ai-ta-dap-ya-śak-to’-si
kar-tuṃ mad-yo-ga-mā-śri-taḥ |
sar-va-kar-ma-**pha**-lat-tyā-gaṃ
ta-tah ku-ru ya-tāt-ma-vān || 11 ||

श्रेयो हि ज्ञानमभ्यासात्
ज्ञानाद्ध्यानं विशिष्यते ।
ध्यानात्कर्म-फल-त्यागः
त्यागाच्छान्तिरनन्तरम् ॥ १२ ॥

śre-yo hij jñā-na-ma-**bh**yā-sāt
jñā-nād-**dh**yā-naṃ vi-śiṣ-ya-te |
**dh**yā-nāt-kar-ma-**pha**-lat-tyā-gaḥ
tyā-gāc-**ch**ān-ti-ra-nan-ta-ram || 12 ||

अद्वेष्टा सर्व-भूतानां
मैत्रः करुण एव च |
निर्ममो निरहङ्कारः
समदुःखसुखः क्षमी || १३ ||

ad-veṣ-ṭā sar-va-**bh**ū-tā-nāṃ
mai-trah ka-ru-ṇa e-va ca |
nir-ma-mo ni-ra-haṅ-kā-raḥ
sa-ma-duh-**kh**a-su-**kh**aḥ kṣa-mī || 13 ||

| | |
|---|---|
| सन्तुष्टस् सततं योगी | san-tu**ṣ**-ṭas sa-ta-taṃ yo-gī |
| यतात्मा दृढनिश्चय: । | ya-t**ā**t-m**ā** dṛ-**ḍh**a-ni**ś**-ca-yaḥ \| |
| मय्यर्पितमनोबुद्धिः | may-yar-pi-ta-ma-no-bud-**dh**iḥ |
| यो मद्भक्तस् स मे प्रिय: ॥ १४ ॥ | yo mad-**bh**ak-tas sa me pri-yaḥ \|\| 14 \|\| |
| | |
| यस्मान्नोद्विजते लोकः | yas-m**ā**n-nod-vi-ja-te lo-kaḥ |
| लोकान्नोद्विजते च य: । | lo-k**ā**n-nod-vi-ja-te ca yaḥ \| |
| हर्षामर्ष-भयोद्वेगैः | har-**ṣā**-mar-**ṣ**a-**bh**a-yod-ve-gaiḥ |
| मुक्तो यस् स च मे प्रिय: ॥ १५ ॥ | muk-to yas sa ca me pri-yaḥ \|\| 15 \|\| |
| | |
| अनपेक्षश् शुचिर्दक्षः | a-na-pek-**ṣ**a**ś** **ś**u-cir-dak-**ṣ**aḥ |
| उदासीनो गतव्यथ: । | u-d**ā**-sī-no ga-tav-vya-**th**aḥ \| |
| सर्वारम्भ-परित्यागी | sar-v**ā**-ram-**bh**a-pa-rit-ty**ā**-gī |
| यो मद्भक्तस् स मे प्रिय: ॥ १६ ॥ | yo mad-**bh**ak-tas sa me pri-yaḥ \|\| 16 \|\| |
| | |
| यो न हृष्यति न द्वेष्टि | yo na hṛ**ṣ**-ya-ti nad-dve**ṣ**-ṭi |
| न शोचति न काङ्‌ क्षति । | na **ś**o-ca-ti na k**ā**ṅk-**ṣ**a-ti \| |
| शुभाशुभ-परित्यागी | **ś**u-**bhā**-**ś**u-**bh**a-pa-rit-y**ā**-gī |
| भक्तिमान्यस् स मे प्रिय: ॥ १७॥ | **bh**ak-ti-m**ā**n-yas sa me pri-yaḥ \|\| 17\|\| |
| | |
| समश् शत्रौ च मित्रे च | sa-ma**ś** **ś**at-trau ca mit-tre ca |
| तथा मानापमानयो: । | ta-**thā** m**ā**-n**ā**-pa-m**ā**-na-yoḥ \| |
| शीतोष्ण-सुख-दु:खेषु | **ś**ī-to**ṣ**-**ṇ**a-su-**kh**a-du*h*-**kh**e-**ṣ**u |
| समस् सङ्ग-विवर्जित: ॥ १८ ॥ | sa-mas saṅ-ga-vi-var-ji-taḥ \|\| 18 \|\| |

| | |
|---|---|
| तुल्यनिन्दास्तुतिर्मौनी | tul-ya-nin-dā-stu-tir-mau-nī |
| सन्तुष्टो येन केनचित् । | san-tuṣ-ṭo ye-na ke-na-cita \| |
| अनिकेतस् स्थिरमतिः | a-ni-ke-tas sthi-ra-ma-tiḥ |
| भक्तिमान्मे प्रियो नरः ॥ १९ ॥ | **bh**ak-ti-mān-me pri-yo na-raḥ \|\| 19 \|\| |

| | |
|---|---|
| ये तु धर्म्यामृतमिदं | ye tu **dh**ar-myā-mṛ-ta-mi-daṃ |
| यथोक्तं पर्युपासते । | ya-**th**ok-taṃ par-yu-pā-sa-te \| |
| श्रद्दधाना मत्परमाः | śrad-da-**dh**ā-nā mat-pa-ra-māḥ |
| भक्तास्तेऽतीव मे प्रियाः ॥ २० ॥ | **bh**ak-tās-te-'tī-va me pri-yāḥ \|\| 20 \|\| |

| | |
|---|---|
| ॐ तत् सत् | oṃ tat-sata |
| इति श्रीमद्-भगवद्-गीतासु | i-tiś śrī-mad-**bh**a-ga-vad-gī-tā-su |
| उपनिषत्सु | u-pa-ni-ṣat-su |
| ब्रह्म-विद्यायां | brah-ma-vid-yā-yāṃ |
| योग-शास्त्रे | yo-ga-śās-tre |
| श्री कृष्णार्जुन-संवादे | śrī kṛṣ-ṇār-ju-na-saṃ-vā-de |
| भक्तियोगो नाम | **bh**ak-ti-yo-go nā-ma |
| द्वादशोऽध्यायः | dvā-da-śo-'**dh**yā-yaḥ |

| | |
|---|---|
| ॐ श्री कृष्णार्पणमस्तु | oṃ śrī kṛṣ-ṇār-pa-ṇa-mas-tu |